षा प्रत्यर्पणीयमित्यतिस्थूलत्वात् स्मृतिकारैरुपेक्षित-मित्यस्माहणादानप्रकारवदुवन्नेयं यदि ग्राहकोऽसौ स्वयं न ददाति तदा स्थापकः प्रत्यनन्तरो वा पूर्वोक्तमार्गेणा-न्विच्छेत् सम्प्रतिपन्नं पूर्वोक्तेन प्रकारेण परिग्रहं साध-येदित्येतदपि स्मृतिकारैरुपेक्षितं ग्राह्यं शक्यत्वादिति । "द्वयीषु निः(नि)क्षेप इवार्पितं द्वयम्" कुमा० ।

**निःप्रभ** त्रि० निर्गता प्रभा यस्य "प्रादिभ्यो धातुजस्य वाचो-त्तरपदलोपः" वार्त्ति० । गतशब्दलोपः वा विसर्गस्य षत्वम्, १प्रभाशून्ये पक्षे षत्वे निष्प्रभ इत्यपि तत्रार्थे

**निःशम** पु० निर्गतः शमात् "निरादयः क्रान्ताद्यर्थे पञ्चम्याः" वार्त्ति० निरा० ५त० । १क्रोधे त्रिका० पक्षे शत्वम् ।

**निःशलाक** त्रि० निर्गतः शलाकायाः निर्गता शलाका यस्मात् वा । १निर्जने रहसि अमरः । "अरण्ये निःशलाके वा मन्त्रयेदविभावितः" मनुः वा शत्वम् ।

**निःशल्या** स्त्री निर्गतं शल्यं यस्याः ५ब० । १दन्तीवृक्षे राजनि० तत्सेवने हि शीघ्रं शल्यं निर्गच्छति । २शल्य-वत्प्रतिबन्धकरहिते त्रि० "निःशल्यमुत्सृजेयं जीवितम्" दशकुमा०पक्षे शत्वम् । [२अपशून्यमात्रे त्रि०। वा शत्वम्

**निःशूक** पु० निर्गतः शूकोऽस्मात् । १सुखण्डशालौ राजनि०

**निःशेष** त्रि० निर्गतः शेषो यस्य । समस्ते सकले "निःशेष च्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरः" काव्यप्र० वा शत्वम् । निश्शेष तत्रार्थे [पक्षे शत्वम् ।

**निःशोध्य** त्रि० निर्गतं शोध्यमस्मात् । निर्मले स्वच्छे अमरः ।

**निःश्रयणी** स्त्री निश्चितं श्रीयतेऽनया श्रि—करणे ल्युट् ङीप् । काष्ठमयसोपाने शब्दरत्ना० वा शत्वम् । निःश्रि—इनि ङीप् । निश्रयिणीत्यप्यत्र शब्दर० ।

**निःश्रेणि** स्त्री निश्चिता श्रेणिरत्र । काष्ठसोपाने अमरः । वा शत्वम् । "चक्रे त्रिदिवनिःश्रेणिः सरयूरनुया-यिनाम्" रघुः ।

**निःश्रेयस** न० नितराम् श्रेयः नि० अच् समा० । १मोक्षे २मङ्गले ३विज्ञाने ४भक्तौ ५अनुभावे च शब्दरत्ना० । "पण्डितो ह्यर्थकृच्छ्रेषु निःश्रेयसकरं वचः" भा०स० १६८श्लो० "तपो विद्या च विप्रस्य निःश्रेयसकरं परम्" मनुः । नितरां श्रेयो यस्मात् अच् समा० । ६शङ्करे पु० मेदि० वा शत्वम् । निश्श्रेयस तत्रार्थे

**निःश्वास** पु० निर्+श्वस—भावे घञ् । प्राणवायोर्नासया बहिर्निःसरणे "वृषलीफेनपीतस्य निःश्वासोपहतस्य च" मनुः । वा शत्वम् । निश्श्वास तत्रार्थे

**निःषम** अव्य० निर् सम+तिष्ठद्गुवा०स० सुषामा० षत्वम् । निन्दायाम् अमरः ।

**निःषन्धि** त्रि०निष्क्रान्तः सन्धेः सुश्लिष्टत्वात् निरादिस० सु-षामा० षत्वम् । १सन्धिशून्ये २दृढे त्रिका० वा षत्वम् ।

**निःषामन्** त्रि० निष्क्रान्तः साम्नः निरा० सुषामा० षत्वम् । सामरहिते वा षत्वम् ।

**निःसम्पात** पु० निर्गतः सम्पातो यत्र प्रादि० बहु० । गमन-शून्ये १निशीथे त्रिका०वा सत्वम् । २गतिशून्ये च "आका-शमपि बाणौघैर्निःसम्पातं विधीयताम्" हरिवं०९८अ० ।

**निःसंशय** त्रि० निर्गतः संशयोऽस्मात् प्रा०ब० । सन्देहशून्ये "क्षते निःसंशये पापे न भुञ्जीतानुपस्थितः" प्रा०त० । पक्षे सत्वम् । निःसन्देहोऽप्यत्र ।

**निःसङ्ग** त्रि० निर्गतः सङ्गो यस्मात् प्रा० बहु० । सङ्गरहिते सङ्गश्च स्नेहः फलाभिसन्धिश्च "निःसङ्गता मुक्तिपदं यतीनाम्" विष्णुपु० "वेदोक्तमेव कुर्वाणो निःसङ्गोऽ-र्पितमीश्वरे" मल०त० धृत भाग०११ स्कन्धवचनम् ।

**निःसरण** न०निर्+सृ—भावे ल्युट् । १निर्गमे करणे ल्युट् । २गृहादिमुखे ३मरणे ४निर्वाणे ५उपाये च हेमच० । "दुःखनिःसरणं वेद सर्वज्ञः स सुखी भवेत्" भा०शा० २१५अ० वा सत्वम् ।

**निःसार** पु० निर्गतः सारो यस्मात् । १शाखोटकवृक्षे (सेओडा) २श्योनाकभेदे राजनि० ३साररहिते त्रि० । "मानुष्ये कदलीस्तम्भनिःसारे सारमार्गणम्" उ०त० "जगत् सर्वन्तु निःसारमनित्यं दुःखभाजनम्" का-लिकापु० २७अ० । ४कदल्यां स्त्री वा सत्वम् ।

**निःसारण** न० निर्+सृ—णिच् ल्युट् । १बहिष्करणे स्वार्थे णिच् करणे ल्युट् वा । २गृहादिमुखे ३निःसरणे च शब्दर० वा सत्वम् । [जटाधरः ।

**निःसारित** त्रि० निर्+सृ—णिच् कर्मणि क्त । बहिष्कृते

**निःसीम(न्)** निर्गता सीमा यस्मात् निरादि०बहु० । सीमा-रहिते अवधिशून्ये "निःसीमानन्दमासीदुपनिषदुपमा तत्परीभूय भूयः" नैष० "अहह महतां निःसीमानश्च-रित्रविभूतयः" भार० २०अत्र डापोऽभावपक्षे नान्तत्वात् स्त्रियां वा टाप् मनन्तत्वात् न ङीप् इति भेदः । वा सत्वम्

**निःस्नेह** त्रि० निर्गतः स्नेहो यस्य प्रादि० बहु० । स्नेहशून्ये स्नेहश्च तैलादिद्रव्यं प्रीतिश्च । "निःस्नेहं कीटसुषि-तम्" स्मृतिः "ये प्रतिग्रहनिःस्नेहास्ते नराः स्वर्गवा गामिनः" भा०अनु० २३अ० । २अतस्यां स्त्री त्रिका० तस्य